पौत्रे बलिदैत्ये २असुराध्यक्षमात्रे च भा० आ० प० वकासुरवधने । "दुष्टो मानुषमांसेन दुर्बुद्धिः पुरुषादकः । रचत्यसुरराट् नित्यमिमं जनपदं बली" ।

**असुररिपु** पु० असुराणां रिपुः । दानवशत्रौ विष्णौ । असुरारिप्रभृतयोऽप्यत्र । [तुलसीभेदे

**असुरसा** स्त्री न सुष्ठु रसो यस्याः ५ब० । (वावुइतुलसी)

**असुरहन्** त्रि० असुरं हन्ति-हन् क्विप् । असुरनाशके । "प्राग्नये विश्वशुचे धियन्धेऽसुरघ्ने" ऋ०७'१३,१ । स्त्रियां नान्तत्वात् ङीप् । असुरघ्नी ।

**असुरार्य्य** पु० ६त० । शुक्राचार्य्ये । [ध्यक्षमात्रे च ।

**असुराधिप** पु० ६त० । १प्रह्लादपौत्रे बलिदैत्ये २असुरा-

**असुराह्व** न० असुरस्याह्वा आह्वा यस्य । कांस्ये हेम० ।

**असुर्य्य** त्रि० असुराय हितः गवा० यत् । १असुरहिते तत्स्वभूते च असुरशब्दे उदा० ।

**असुष्वि** त्रि० सु—बा०कि द्वित्वम् न०त० । सोमाभिषवाकर्त्तरि "विपप्रच्चादसुष्वीन् ऋ०४,२४,५ । जहत्रसुष्वीन् प्रहा पृणत" ऋ०६,४४,११ । "असुष्वीन् अनभिषोतॄन्-यजमानान्" भाष्यम् ।

**असुलभ** त्रि० न सुलभः विरोधे । दुर्लभे दुःखेन प्राप्ये ।

**असुसु** पु०असून् प्राणान् सुवति सू—क्विप् । वाणे "स सासिः सासुसूः सासो येयायेयाययाययः" किरा० । [भूते च ।

**असुस्थ** त्रि० विरोधे न०त० । १दुःखेन स्थातरि २रोगाद्यभि-

**असुहृद्** पु० विरोधे न०त० । सुहृद्भिन्ने रिपौ "शलभतां लभतामसुहृद्गणः" माघः ।

**असू** स्त्री न प्रसूते सू—क्विप् । अप्रसवायां स्त्रियाम् "याभिर्धेनुमस्वम्" ऋ०१,११२,३ । [अनादरे अवज्ञायाम्

**असू(च)चण** न०सू(सूर्च)च आदरे ल्युट् अभावे न०त० ।

**असूक्ष्म** त्रि० विरोधे न०त० । सूक्ष्मताविरोधिस्थूलत्ववति ।

**असूत** त्रि० न०त० । अप्रसूते । [दोषारोपणशीले ।

**असूयक** त्रि० (असु)असूज-कण्ड्वादि० यक्-खुल् । गुणेषु

**असूया** स्त्री असु (असू)—उपतापे कण्ड्वा० यक् अ । परगुणेषु दोषाविष्करणे "पैशुन्यं साहसं द्रोहईर्षासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोदशकोगणः" मनुः । "क्रुधद्रुहेर्य्यासूयार्थानां यं प्रति कोपः", पा० । "असूया परगुणेषु दोषाविष्करणम्" सि०कौ० ।

**असूयु** त्रि० असु(सू)—कण्ड्वा० यक् उन् । असूयाशीले "इदन्तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे" गीता ।

**असूर** त्रि० सूरी सम्भे धातूनामनेकार्थत्वात् स्तुतौ भावे घञ् न०ब० । स्तोत्ररहिते । "असूरे सन्ति सूरयः" ऋ०८,१०,४ । ["असूर्त्ते सूर्त्ते रजसि" यजु०१७,१७ ।

**असूर्त्त** त्रि० सूरी क्त इडभावः न तस्य नत्वम् । "अप्रेरिते

**असूर्य्यम्पश्या** त्रि० सूर्य्यमपि न पश्यति दृश—खश् मुम् च अस०समा० । अत्यन्तगुप्ते सूर्य्यादर्शिनि राजदारादौ । "असूर्य्यम्पश्यरूपा त्वं किमभीरुररार्य्यसे ?" भट्टिः ।

**असृक्कर** पु० असृक् शोणितं करोति कृ—ट । शरीरस्थे रसधातौ, अन्नादेरशितस्य प्रथमं रसरूपता, रसस्य रक्तरूपतेति वैद्यके प्रसिद्धम् । अथ रसस्य यथा रक्तकरत्वम् तथोक्तं सुश्रुते । "रसाद्रक्तं ततोमांसं मांसान्मेदः प्रजायते । मेदसोऽस्थि ततोमज्जा मज्ज्ञः शुक्रस्य सम्भवः" तत्पाकप्रकारमाह भाव० प्रका० । "यात्यामाशयमाहारः पूर्व्वं प्राणानिलेरितः । माधुर्य्यं फेनभावञ्च षड्रसोऽपि लभेत सः" । "आहार्य्यं षड्विधं भोज्यं भक्ष्यं चर्व्यं तथैव च । लेह्यं चूष्यं तथा पेयं तदुदाहरणानि तु । भोज्यमोदनपूपादि भक्ष्यं मोदकमण्डकम् । चर्व्यं चिपिटधानादि-रसलादि तु लिह्यते । चूष्यमाम्रफलेक्ष्वादि पीयते पानकं पयः" । आमाशयमाह चरकः "नाभिस्तनान्तरे जन्तोराहुरामाशयं बुधाः" । तत्र विशेषमाह । "उरोरक्ताशयस्तस्मादधःश्लेष्माशयःस्मृतः । आमाशयस्तु तदधस्तदधोहि मलाशयः" । अनिलेरित इति हृदयाधिष्ठानेन प्राणनाम्ना वायुना सुखंगतेनान्तःप्रवेशितः । तथाह सुश्रुते । "योवायुः प्राणनामासौ सुखं गच्छति देहधृक् । सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बत" इति । तमाहारमामाशयस्थं क्लेदननामकफः क्लेदयति क्लेदनात्संहतं भिनत्ति च । उक्तं च सुश्रुते । "क्लेदनः क्लेदयत्यन्नं संहतं च भिनत्त्यतः" इति स आहारः षड्रसोऽप्यामाशये माधुर्यं लभते आमाशयस्थस्य मधुरस्य कफस्य योगात् । उक्तं च श्लेष्मस्वरूपम् "श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीतलस्तथा । तमोगुणाधिकः स्वादुर्विदग्धोलवणो भवेदिति" । "फेनभावं च लभते जठरानलतेजसा" । यतआह वाग्भटः "संधुक्षितः समानेन पचत्यामाशयस्थितम् । औदर्य्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलम्" इति । अथ सएवाहारः प्राणवायुना प्रेरितस्ततः किञ्चित्स्खलितः पाचकाख्यपित्तोष्मणेषत्पक्वोऽम्लोभवति । उक्तं च । "अथ पाचकपित्तेन विदग्धस्याम्लतां व्रजेदिति" पाचकपित्तेन पाचकपित्तोष्मणा ततः स एवाहारो नाभिमण्डलाधिष्ठानेन समाननाम्ना वायुना प्रेरितोग्रहणीम् प्रति नीयते उक्तञ्च । "ततः समान